# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – १** | गुणाः - ७० |
| विषयः – अनिवार्यसंस्कृतम् | ---- | समयः – ११ तः २ |
| दिनाङ्कः – १६/४/२०१६ | सन्दर्भग्रन्थः – उत्तररामचरितम् (४-७ अङ्काः) | |

**प्रथमान्वितिः -१**

**प्रश्नः -१ अधोलिखितश्लोकेभ्यः द्वयोः ससन्दर्भं व्याख्या कुर्वन्तु ।** ०८

(१) स सम्बन्धी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं,
स चानन्दः साक्षादपि च निखिलं जीवितफलम् ।
शरीरं जीवो वा यदधिकमतोऽन्यत्प्रियतरं,
महाराजः श्रीमान्किमिव मम नासीद्दशरथः ॥

(२) वत्सायश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते,
सम्पूर्णप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ,
हा हा दैव किमुत्पथैर्मम मनः पारिप्लवं धावति ।

(३) ज्याजिह्वया वलयितोत्कटकोटिद्रंष्टमुद्गारिघोरं घनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बि विकटोदरमस्तु चापम् ॥

**प्रश्नः -२** दाण्डायनस्य पात्रलेखनं कुर्वन्तु ।

अथवा ०८

चतुर्थोऽङ्कस्य सारांशं लिखन्तु ।

**प्रश्नः -३ अधोलिखिताभ्यः द्वे टिप्पण्यौ लिखन्तु ।** ०४

(१) अरुन्धती (२) कौशल्याजनकमेलनम् (३) कञ्चुकी (४) विष्कम्भकः

**प्रश्नः - ४ अधोलिखितेभ्यः पञ्चप्रश्नानामेकैकवाक्येन उत्तरं लिखन्तु ।** ०५

(१) सौधातकिः कः अस्ति ?

(२) तपोवने के के अतिथयः आगच्छन्ति ?

(३) जनकाय कस्याः दर्शनं क्षते क्षारमिव अरुह्यं भवति ?

(४) गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः – इत्युक्तिः का वदति ?

(५) आश्रमे किमर्थं अनध्ययनम् अस्ति ?

(६) उर्मिलायाः पुत्रः कः अस्ति ?

(७) यमजौ भ्रातरौ कौ स्तः ?

**द्वितीयान्वितिः - २**

**प्रश्नः -५ अधोलिखितेभ्यः द्वयोः श्लोकयोः ससन्दर्भं व्याख्यां कुर्वन्तु ।** ०८

(१) मुनिजनशिशुरेकः सर्वतः सैन्यकाये नव इव रघुवंशास्याप्रसिद्धः प्ररोहः ।
दलितकरिकपोलग्रन्थिटङ्कारघोरज्वलितशरसहस्रः कौतुकं मे करोति ॥

(२) वृद्धास्ते विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते,
सुन्दस्त्रीमथनेऽप्यकुण्ठयशसो लोके महान्तो हि ते ।
यानि त्रीण्यपराङ्मुखान्यपि पदान्यान्खरायोधने ,
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥

(३) कामं दुग्धे विप्रकर्षत्यलक्ष्मी कीर्तिं सूरे दुष्कृतं या हिनस्ति ।
तां चाप्येतां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः ।

लवचन्द्रकेतवोः संवादप्रसङ्गं समीक्षन्तु ।

**प्रश्नः -६** अथवा ०८

पञ्चमाङ्कस्य कुमारविक्रमः इति नाम्नः सार्थक्यं विवेचयन्तु ।

**प्रश्नः -७** **अधोलिखिताभ्याम् एकां टिप्पणीं लिखन्तु ।** ०२

(१) जुम्भकास्त्रम्

(२) तेजस्तेजसि शाम्यतु इत्यत्र सन्दर्भसार्थक्यम् ।

**प्रश्नः -८** **निम्नलिखितेभ्यः द्वयोः उत्तरं लिखन्तु ।** ०२

(१) चन्द्रकेतोः सारथिः कः अस्ति ।

(२) अयद्भुतादसि गुणातिशयात्प्रियो मे – एषः पद्यांशः कः वदति ?

(३) प्राणीनाम् अन्तर्मर्माणि कः सीव्यति ?

(४) भगवान् भृगुनन्दनः कः अस्ति ?

## तृतीयान्वितिः - ३

**प्रश्नः -९** **अधस्तनेभ्यः श्लोकेभ्यः द्वयोः ससन्दर्भं व्याख्यां कुर्वन्तु ।** ०८

(१) व्यतिषजति पदार्थनान्तरः कोऽपि हेतु, न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं, द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥

(२) विना सीतादेव्या किमिव हि न दुःखं रघुपतेः,
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः,
किमेवं त्वं पृच्छस्यनगधितरामायण इव ॥

(३) पापभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा,
माङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।
वाल्मीकेः परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः,
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥

गर्भनाटकप्रसङ्गं समीक्षयन्तु ।

**प्रश्नः -१०** अथवा ०८

उत्तररामचरितस्य वैशिष्ट्यं वर्णयन्तु ।

**प्रश्नः -११** **अधोलिखिताभ्यः द्वे टिप्पण्यौ लिखन्तु ।** ०४

(१) सीता (२) वाल्मीकिः (३) विद्याधरमिथुनम् (४) कुशः

**प्रश्नः -१२** **निम्नलिखितप्रश्नेभ्यः पञ्चप्रश्नानाम् उत्तरं लिखन्तु ।** ०५

(१) षष्ठाङ्कस्य विष्कम्भकस्य मुख्यवर्ण्यविषयः कः ?

(२) उत्तररामचरितस्य मुख्यरसः कः ?

(३) कुशस्य अग्रजः कः ?

(४) अति हि नाम मुग्धः शिशुजनः विशेषतस्त्वरण्यचरः – वाक्यमेतत् कस्मिन् सन्दर्भे रामः वक्ति ?

(५) समाजसन्निवेशः इत्यस्य कः अर्थः ?

(६) मधुरेश्वरः कः अस्ति ?

(७) सीतायाः माता का अस्ति ?

***